# १३. पादुका सहस्रम् - पराग पद्धतिः (३०)

पान्तु वः पद्मनाभस्य पादुका केलि पांसवः ।
अहल्या देह निर्माण पर्याय परमाणवः ॥ १३.१॥ ३५१॥

तव सञ्चरणाद्रजो विधूतं यदिदं रङ्गनरेन्द्र पादरक्षे ।
अलमेत दनाविलानि कर्तुं कतकक्षोद इवाशु मानसानि ॥ १३.२॥ ३५२॥

पुनरुक्त पितामहानुभावाः पुरुषाः केचिदमी पुनन्ति विश्वम् ।
मधुवैरि पदारविन्द बन्धोः अपरागास्तव पादुके परागैः ॥ १३.३॥ ३५३॥

अभियुक्त जनो निजार्भकाणां बहुशो रङ्गनरेन्द्र पादरक्षे ।
अवलेप पिशाच मोचनार्थं रजसा लिम्पति तावकेन देहान् ॥ १३.४॥ ३५४॥

शिरसा परिगृह्य लोकपालाः तव रङ्गेश्वर पादुके रजांसि ।
विषमेषु बलेषु दानवानां व्यपनीतान्य शिरस्त्र माविशन्ति ॥ १३.५॥ ३५५॥

कृतिनः शिरसा समुद्वहन्तः कतिचित् केशव पादुके रजस्ते ।
रजसस् तमसोऽपि दूरभूतं परिपश्यन्ति विशुद्धमेव सत्वम्॥ १३.६॥ ३५६॥

अधिकं पदमाश्रितोऽपि वेधाः प्रयतो रङ्ग धुरीण पादरक्षे ।
अभिवाञ्छति सङ्गमं परागैःअभिजातैस्तव देवि नाभिजातः॥ १३.७॥३५७॥

शुद्धसत्त्व वपुषैव भवत्या पादुके विरजसौ हरिपादौ ।
अस्तु किं पुनरिदं रजसा ते शुद्धसत्त्व मयता मनुजानाम् ॥ १३.८॥ ३५८॥

तद्रजस्तव तनोति पादुके
मानसान्य कठिनानि देहिनाम् ।
प्रस्तरस्य पदवी गतस्य यत्
व्याचकार मुनि धर्म दारताम् ॥ १३.९॥ ३५९॥

रङ्गेशयस्य पुरुषस्य जगद्विभूत्यै
रथ्या परिक्रम विधौ मनिपादरक्षे ।
सीमन्त देश मनवद्य सरस्वतीनां
सिन्दूरयन्ति भवती चरिताः परागाः ॥ १३.१०॥ ३६०॥

मान्येन रङ्गनृपते र्मणिपादरक्षे
चूडापदानि रजसा तव भूषयन्तः ।
कालक्रमेण भजतां कमलासनत्वं
नाभी सरोज रजसां निवसन्ति मध्ये ॥ १३.११॥ ३६१॥

मात र्मुकुन्द चरणावनि तावकीनाः
चिन्ता वशीकरण चूर्ण विशेष कल्पाः ।
सञ्चार पांसु कणिकाः शिरसा वहन्तो

विश्वं पुनन्ति पदपद्म परागलेशैः ॥ १३.१२॥ ३६२॥

आयोजिता न्यमलधीभि रनन्य लभ्ये
पादावनि श्रुतिवधू पटवास कृत्ये ।
त्वत्सञ्चर प्रचलितानि रजांसि शौरेः
प्रख्या पयन्ति पदपद्म पराग शोभाम् ॥ १३.१३॥ ३६३॥

मूर्धान मम्ब मुरभिन् मणिपादरक्षे
येषां कदाऽपि रजसा भवती पुनाति ।
त्वामेव ते सुकृतिनः स्नपयन्ति काले
मन्दार दाम रजसा मकुटच्युतेन ॥ १३.१४॥ ३६४॥

रथ्याविहार रजसा परिधूसराङ्गीं
रङ्गेश्वरस्य ललितेषु महोत्सवेषु ।
प्रस्फोटय त्यवनतो मणिपादुके त्वां
गौरीपतिः स्वय मिभाजिन पल्लवेन ॥ १३.१५॥ ३६५॥

नेदीयसां निज पराग निवेश पूर्वं
स्पृष्ट्वा शिरांसि भवती भवरोग भाजाम् ।
गाढं निपीड्य गरुड ध्वज पादरक्षे
मानग्रहं शमय तीव परैरसाध्यम् ॥ १३.१६॥ ३६६॥

आपात वल्लव तनोर कुमार यूनः
पादावनि प्रविशतो यमुनानि कुञ्जान् ।
आसी दनङ्ग समरात्पुरतः प्रवृत्तः
सेनापराग इव ते पदवी परागः ॥ १३.१७॥ ३६७॥

गङ्गापगा तटलता गृहमाश्रयन्त्याः
पादावनि प्रचलितं पदवीरजस्ते ।
प्रायेण पावनतमं प्रणतस्य शम्भोर्-
उद्धूलनं किमपि नूतन मातनोति ॥ १३.१८॥ ३६८॥

अन्ते तदा त्वमविलम्बित मानयन्ती
रङ्गाद्भुजङ्ग शयनं मणिपादरक्षे ।
कामं निवर्तयितु मर्हसि सज्ज्वरं मे
कर्पूर चूर्ण पटलै रिव धूलिभिस्ते ॥ १३.१९॥ ३६९॥

रङ्गेश पाद सहधर्मचरि त्वदीयान्
मौलौ निवेश्य महितान्पदवी परागान् ।
सन्त स्त्रिवर्ग पदवी मतिलङ्घयन्तो
मौलौ पदं विदधते विबुधेश्वराणाम् ॥ १३.२०॥ ३७०॥

मातस्तदा माधव पादरक्षे त्वयि प्रसक्तं त्वरयोपयान्त्याम् ।
परामृशेयं पदवी परागं प्राणैः प्रयाणाय समुज्जिहानैः ॥ १३.२१॥ ३७१॥

तथागता राघव पादरक्षे सम्पश्यमानेषु तपोधनेषु ।
आसीदहल्या तव पांसुलेशैः अपांसुलानां स्वयमग्रगण्या ॥ १३.२२॥ ३७२॥

पश्यामि पद्मेक्षण पादरक्षे भवाम्बुधिं पातुमिव प्रवृत्तान् ।
भक्तोपयान त्वरया भवत्याः पर्यस्यमानान्पदवी परागान् ॥ १३.२३॥ ३७३॥

पञ्चायुधी भूषणमेव शौरेः यतस्तवैते मणिपादरक्षे ।
वितन्वते व्याप्तदिशःपरागाः शान्तोदयाञ्छत्रु चमूपरागान्॥ १३.२४॥३७४॥

परिणति मकठोरां प्राप्तया यत्प्रभावात्
अलभत शिलया स्वान् गौतमो धर्मदारान् ।
पुनरुपजनिशङ्का वारकं पादुके तत्
प्रशमयति रजस्ते रागयोगं प्रजानाम् ॥ १३.२५॥ ३७५॥

रजनि विगमकाले रामगाथां पठन्तः
कुशिक तनय मुख्याः पादुके भावयन्ते ।
उपल शकल सक्तै स्त्वत्परागै रकाण्डे
जनित मुनि कलत्रान् दण्डकारण्य भागान् ॥ १३.२६॥ ३७६॥

शुभ सरणि रजोभिः शोभयन्ती धरित्रीं
परिणति रमणीया न्प्रक्षरन्ती पुमर्थान् ।

भवसि भुवन वन्द्या पादुके रङ्गभर्तुः
शरण मुपगतानां शाश्वती कामधेनुः ॥ १३.२७॥ ३७७॥

पवन तरलितस्ते पादुके रङ्गभर्तुः
विहरण समयेषु व्याप्तविश्वः परागः ।
विषम विषय वर्त्म व्याकुलाना मजस्रं
व्यपनयति जनानां वासना रेणुजालम् ॥ १३.२८॥ ३७८॥

निष्प्रत्यूह मुपासिषी महि मुहु र्निश्शेष दोषच्छिदो
नित्यं रङ्गधुरन्धरस्य निगम स्तोमार्चिते पादुके ।
धत्ते मूर्धभि रादिपद्म जनिता तत्तादृशी सन्ततिः
यत्सञ्चार पवित्रित क्षितिरजःपङ्क्तिं चतुःपञ्चषैः ॥ १३.२९॥ ३७९॥

रजसा परो रजस्तत् न खलु न लङ्घ्येत भगवतोऽपि पदम् ।
किमुत हृदयं मदीयं भवती यदि नाम पादुके न स्यात् ॥ १३.३०॥ ३८०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
पराग पद्धति स्त्रयोदशी ॥